# १७. चत्वारः मूर्खपण्डिताः

कस्मिंश्चित् ग्रामे चत्वारः स्नेहिताः आसन्। तेषु त्रयः शास्त्रेषु पारङ्गताः। परन्तु बुद्धिरहिताः। अपरः तु शास्त्रं किमपि न जानाति। परन्तु बुद्धिमान्।

एकदा ते चिन्तितवन्तः - 'वयं देशान्तरं गत्वा महाराजस्य पुरतः अस्माकं पाण्डित्यं प्रदर्श्य धनसम्पादनं कुर्मः' इति। एवं चिन्तयित्वा ते देशान्तरं प्रस्थिताः।





मार्गे ते एकस्य मृतसिंहस्य अस्थीनि दृष्टवन्तः। तदा प्रथमः उक्तवान् - ''भोः स्नेहिताः! अस्माकं विद्यायाः परीक्षां कुर्तुम् एकः अवकाशः लब्धः। वयम् एतं सिंहं जीवसहितं कुर्मः'' इति।

अनन्तरं सः सिंहस्य अस्थीनि योग्यक्रमेण योजितवान्। द्वितीयः तत्र रक्तमांस-चर्मादिकं संयोजितवान्। तृतीयः यदा तस्य जीवदानं कर्तुम् उद्युक्तः तदा शास्त्रज्ञानरहितः चतुर्थः उक्तवान् - ''भोः, यदि एषः सिंहः जीवितः भवति, तर्हि अस्मान् मारयति। अतः तस्य जीवदानं न करणीयम्'' इति।

तदा तृतीयः उक्तवान् - ''मूर्ख! मया अपि मम विद्यायाः परीक्षा करणीया अस्ति। अतः अहं जीवदानं करोमि एव'' इति।

तदा चतुर्थः - ''तर्हि एकं क्षणं तिष्ठतु। अहं वृक्षम् आरोहामि'' इति उक्त्वा एकं वृक्षम् आरूढवान्। तृतीयः सिंहस्य जीवदानं कृतवान्। तदा सः जीवितः सिंहः त्रीन् अपि पण्डितान् मारितवान्, तृप्त्या ततः निर्गतः च। अनन्तरं चतुर्थः वृक्षतः अवतीर्य ग्रामम् आगतवान्।

अतः पण्डिताः वदन्ति - ''विद्यायाः अपेक्षया बुद्धिः एव गरीयसी'' इति।